International Journal of Sanskrit Research 2017; 3(4): 94-96

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 94-96
© 2017 IJSR
www.anantaajournal.com
Received: 18-05-2017
Accepted: 19-06-2017

डॉ. सुमन रानी
LECT. Sanskrit, G.S.S.S. Suketri, Panchkula, Haryana, India

Correspondence
डॉ. सुमन रानी
LECT. Sanskrit, G.S.S.S. Suketri, Panchkula, Haryana, India

# श्रीमदभगवद्गीतायाम् आधुनिक समाजस्य विवेचनम्

डॉ. सुमन रानी

महाभारतसारभूता–श्रीमद्भगवद्गीता संस्कृतसाहित्यस्यैकं देदीप्यमानं रत्नम्। इयञ्च महाभातस्य भीष्मपर्वणि सुगुम्फिता विद्यते। नितान्त सरलसुबोधशैल्यां विरचितमिदं ग्रन्थरत्नं न केवलं भारतीयसंस्कृतेः अपितु सम्पूर्णजगतोऽमूल्यसांस्कृतिकनिधिरूपेण स्वीक्रियते। अद्यत्वे समाजे सर्वासु दिक्षु मानवमूल्यानाम्, आदर्शानां, निरन्तरमेव ह्रासः परिलक्ष्यते, धनादिकदृष्ट्या तु वयं सम्पन्नतामनुभवामः परन्तु यस्य कृते एतेषां सर्वेषामेव सङ्ग्रहं कुर्मः तस्य तु सर्वथैव अभावः परिलक्ष्यते, आकृमेराकुञ्जराद् यदि वयं सर्वेषां प्रयत्नानां प्रयासानां वा विश्लेषणं कुर्मः, तदा इदं हि स्पष्टीभविष्यति यद् सर्वे सुखाय एव सर्वाणि अपि कार्याणि कुर्मः। प्रयासस्तु अनवरतगत्या चलति, परञ्च न तदनुरूपं फलमिति वीक्ष्य नूनं नैराश्यप्राप्तिः। अद्यत्वे वयं याभिरपि समस्याभिः ग्रस्ताः, न ताभ्यो मुक्तेरुपायः कश्चित्। अस्यां विकटपरिस्थितौ एतादृशानां सर्वासामपि समस्यानां समाधानं श्रीकृष्णस्य श्रीमुखवाणीस्वरूपायां श्रीमद्भगवद्गीतायां स्पष्टरूपेणैव परिलक्ष्यते। आधुनिकयुगेऽपि शान्तिप्रदायिनी गीता मानवजीवनस्याजस्रसमस्यानां समाधानरूपा। एषा न केनापि कालविशेषस्य जातेः, राष्ट्रस्य, धर्मस्य वा सीमायां नियमयितुं शक्यते। सर्वासामपि मानवीयसमस्यानां समाधानमत्र दृष्टिपथमायाति। यदा च कोऽपि किंकर्तव्यविमूढजनो गीताशरणं प्राप्नोति, सुष्ठु तस्य समस्या समाधीते।

स्वतन्त्रभारते असंख्यानां दार्शनिकां, राजनीतिज्ञानां, विचारकाणां च मार्गदशनं गीतया अभवत्। महात्मागांधीमहोदयोऽस्याः अद्भुतशक्तिं स्वीकुर्वन् कुत्रचित् कथयति– यदा नैराश्यं ममाग्रे आयाति, प्रकाशस्य एकमपि किरणं द्रष्टुमक्षमो भवामि, तदाहं गीताश्रयं प्राप्नोमि, प्राप्य च महत्सन्तोषानुभवः।

श्रीलोकमान्यतिलकमहोदयो गीतारहस्यमिति स्वग्रन्थे गीतायाः वर्तमानप्रासङ्गिकतामुररीकरोति। अन्येऽपि अनेके भारतीयविद्वांसो वर्तमाने युग तेषां वा स्वकीयजीवने का उपयोगिता, प्रासङ्गिकता, आवश्यकता इति विस्तरेण विचारयन्ति।

इदं हि तथ्यं सुस्पष्टं, चिरन्तनं, सुविचारमिति अस्मासु यत्किमपि संग्रामरूपं, द्वन्द्वरूपं वा तन्मूले विचारसंग्राम एव, सर्वविधसंग्रामाणामारम्भो विचारेभ्य एव भवति, यतो हि यथा च चिन्तनं मनसा क्रियते तथैन कर्मण्यपि दृश्यते। उक्तमपि–

> यन्मनसा ध्यायते तद्वाचा वदति,
> यद्वाचा वदति, तत्कर्मणा करोति,
> यत्कर्मणा करोति, तदभिसम्पद्यते

मनसा एव सर्वसंग्रामाणामुत्पत्तिः। अनेकैरपि विद्वद्भिः इदं स्वीक्रियते यत् महाभारतस्य देवासुरसंग्रामोऽद्यापि अमूर्तरूपेण प्रत्येकमानवस्य मनसि सदैव चलति।

न केवलं भारतीयग्रन्थेषु अपितु पाश्चात्यादिसम्पूर्णसाम्प्रदायिकग्रन्थेषु अपि विभिन्नरूपेषु संग्रामस्यास्य चर्चा श्रूयते। वेदेषु इन्द्रवृत्रयोः, पुराणेषु देवदानवयोः, रामायणे रामरावणयोः, महाभारते पाण्डवकौरवयोः एवंविधो विरोधः प्रायशः सर्वेषु अपि ग्रन्थेषु प्राप्यते। कुत्रचित् ऐतिहासिकतथ्यानाम् अमानवीयकरणमपि क्रियते।

गीतायाः षोडशे अध्याये मानवस्य दैवीनामासुरीणाञ्च प्रवृत्तीनां वर्णनं प्राप्यते–

> अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः,
> दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।। [1]

एते दैवीप्रकृतियुक्तानां मानवानां गुणाः। तेषामन्यान्यपि लक्षणानि–

अहिंसासत्यमक्रोधः त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं, मार्दवं ह्रीरचापलम्।।
तेजः क्षमाः धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदां दैवीमभिजातस्य भारत।। [2]

आसुरीप्रकृतिमनुष्यानम् अधोलिखिताः दोषाः–

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते।। [3]

अपि च–

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्।। [4]

एवम् उपर्युक्तदैवीगुणयुक्तो योऽपि स देवः, असुरगुणयुक्तश्च असुरः कथ्यते। मौलिकरूपेण एषु विचारेषु यः सङ्ग्रामः स एव खलु देवासुरसंग्रामः। एतादृशं श्रीकृष्णो यदा अर्जुनं युद्धाय प्रेरयति, स आसुरीगुणेभ्य एव। स च अद्य आधुनिकयुगेऽपि प्रासङ्गिकः। समाजस्य दुर्गुणान् दूरीकृत्य अखिलसंसारे प्रेम्णः सञ्चारः, एकतायाः व्यवहार एव खलु सामाजिकदृष्ट्या दैवीसम्पदां प्रसारः। मनुष्यो दैवीगुणैः विना अद्यापि मनुष्यत्वमवाप्तुं न समर्थः। दैवीसम्पदा न केवल कस्यचिद् राष्ट्रस्य अपितु अखिलविश्वस्यापि कल्याणं भवितुमर्हति। अतोऽस्याः महत्ता सार्वभौमिकी विद्यते। अधुनापि गीताया अयं भावोऽस्मत्मार्गदर्शने समर्थः।
अद्यत्वे समाजे प्रथितानां सर्वासामपि समस्यानां मूले कारणभूतस्ति असत्विचारः, असत् भाषणः, असत् कर्म वापि। एतत्समाधानार्थम् अद्यत्वेऽपि गीता नित्यं कर्म समाचर [5] योगः कर्मसु कौशलम् [6] योगस्थः कुरु कर्माणि [7] इत्यादिवाक्यैः अन्तःकरणं निर्मलीकरोति।
गीता मानवाय मानवधर्मस्य विश्वधर्मस्य च पाठं शिक्षयति यथा–

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारो समदुःखसुखः क्षमी।। [8]
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।। [9]

सदाचारस्तु मानवजीवनस्य अपरं नाम, भ्रष्टाचारग्रस्ते अद्यतने समाजेऽस्य सदाचारस्य महती आवश्यकता विद्यते। मनुष्यो बलवात्, विद्वान् अर्थवान् च भवेत् परं तेन सह सदाचारयुतेनापि भाव्यमिति। सदाचारेण विना बलविद्याधनादयो मानवतायाः विनाशाय एव प्रथन्ते। गीता वर्तमानयुगस्य हतोत्साहितमानवस्य मनसि उद्यममुत्पाद्य हृदयस्थां दुर्बलताञ्च दूरीकरोति। यदा अर्जुनो युद्धविमुखो युद्धात् पलायितुमिच्छति तदा तस्मिन् विषमे काले मनसो दौर्बल्यम् अपाकर्तुं कथयति–

क्लैब्यं मा स्म गमः पार्थ नैत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं व्यक्त्वोत्तिष्ठ परंतप।। [10]

कर्मविषये उपदिशन् कथयति 'तस्माद् युध्यस्व भारत' [11] 'तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतिनिश्चयः' [12] सततं कार्यकरणाय कथयति 'तस्मादसक्तः सततं कार्यं समाचर' [13] 'युध्यस्व विगतज्वरः' [14] 'युध्यस्व जेतासि रणे सपत्नान्।' [15]
वर्तमानमानवं सातत्येन कर्तव्यपथे विहर्तुं प्रेरयति। यथा–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।। [16]

वयं मानवाः कर्म तु न्यूनं कुर्मः फलस्येच्छा अधिका भवति अप्राप्ते पुनः दुःखमेव। अत एव अत्र कथ्यते यत् अलं सर्वदैव कर्म कर्तव्यं न फलस्य चिन्ता कर्तव्या यतो हि वयं यदपि कुर्मः स फलवान् भवत्येव यतो हि अयमेव संसारनियमः अवश्यमेव भोक्तव्यं कृति कर्म शुभाशुभम्। [17]
संसारे कोऽपि जनि लभते स मृत्युमपि प्राप्नोति। शरीरनाश एव तत्र सदा न चात्मनाशः परन्तु वयं तु सर्वनाश एव स्वीकुर्मः, तस्मादेव कस्यापि देहान्त भवति चेत् महता दुःखेन प्रकटी भवति, परन्तु ये केऽपि इमं रहस्यं जानन्ति यत् आत्मा अजः, नित्यः शाश्वतो वा ते ऋषिदयानन्द इव मृत्योः भयभीताः न भवन्ति, प्रहसन्नेव मृत्युं वृण्वति। आत्मनो नित्यत्वविषये गीतायां स्पष्टोपदेशः–
'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' [18], 'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः' [19], 'अच्छेद्योऽयमदाह्योयम्' [20], तथैवोपदेशा उपनिषत्स्वपि अक्षिलक्ष्यीभवन्ति। यथा– 'न जायते म्रियते वा विपश्चित्' [21] 'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' [22] इमाः सर्वाः श्रुतयो जीवनस्य नित्यत्वं वर्णयन्ति।
एतदतिरिक्तमपि वर्तमाने सन्दर्भे अस्या उपदेशा विशेषरूपेण महत्त्वपूर्णाः, व्यावहारिकाश्च सन्ति। गीता प्राणिमात्राय समदृष्टिः, अद्वेषः, मैत्री, करुणादि मानवादर्शानां स्थापनां करोति [23] एतेषामादर्शानां स्थापनया एव आतंकवाद इव विनाशकर्मभिः त्रस्ता मानवा त्रातुं शक्यन्ते।
गीतायाः व्यावहारिकदृष्ट्या महत्वस्य एकमपरं कारणमस्याः समन्वयदृष्टिः विद्यते। अस्यां मानवस्याभिप्रायः प्राणिमात्रम् एव, धर्मगताः जन्मगताः वा भेदा अस्यां न दृश्यन्ते। अत्र वर्णव्यवस्था कर्मगतैव। स्वधर्मपालनमेव श्रेयस्करम्–

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठियात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।। [24]

गीतायाः मते ब्राह्मण–क्षत्रिय–वैश्यशूद्राः इति चत्वारः वर्णाः, न जन्मतोऽपितु कर्मतः। यथा– 'चातुवर्ण्यं मया सृष्टं गुणकर्मविभागशः'[25] उपदेशोऽयं अद्यत्वे समाजे वर्णव्यवस्थायाः विषये प्रचलिता अनेकाः भ्रान्तधारणाः उन्मूलयितुं प्रभवति।
उपर्युक्तविस्तृतविवेचनानन्तरं वयं सहजतया एव एतद् वक्तुं शक्नुमो यत् प्रायशः सर्वासामेव आधुनिकसमस्यानां सुष्ठु समाधानम परिलक्ष्यते। गीताया उपदेशाः अद्य विश्वाय अत्यधिकाः प्रासङ्गिकाः प्रतीयन्ते डॉ. सर्वपल्लीराधाकृष्णन्महोदयेन उक्तम्–
''गीतायाः सन्देशस्य क्षेत्रं सार्वभौमं वर्तते। गीताया उपदेशः कस्मैचिदपि सम्प्रदायविशेषाय नैव पि मनुष्यमात्राय।'' मानवः स्वकल्याणाय सततं प्रयतेत–

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।। [26]

वर्तमाने समाजे सर्वेषामेव कृते गीतापदेशस्य महत्वं वीक्ष्य श्रीवेदव्यास्य अतिशयोक्त्या मतैक्यं स्थापयितुमिच्छा भवति–

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिश्रिता।। [27]

**संदर्भ–सूत्र**


1. भगवद्गीता 16/1।
2. भगवद्गीता 16/2–3।
3. भगवद्गीता, 16/7।
4. भगवद्गीता 16/4।
5. भगवद्गीता ।
6. भगवद्गीता 2/50।
7. भगवद्गीता 2/48।
8. भगवद्गीता 13/20।
9. भगवद्गीता 13/14।
10. भगवद्गीता 2/3।

11. भगवद्गीता 2/18।
12. भगवद्गीता 2/37।
13. भगवद्गीता 3/19।
14. भगवद्गीता 3/30।
15. भगवद्गीता 11/33।
16. भगवद्गीता 2/47।
17. मनुस्मृति, ।
18. भगवद्गीता 2/20।
19. भगवद्गीता 2/23।
20. भगवद्गीता 2/24।
21. कठोपनिषद् 2/18।
22. कठोपनिषद् 2/18।
23. भगवद्गीता 13/20।
24. भगवद्गीता 3/35।
25. भगवद्गीता 4/18।
26. भगवद्गीता 6/5।
27. महाभारतम्।